२.पां.

॥ आथर्वणव्यासतीर्थीयटीकाप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ संपूर्णसंविदानंदमुखसर्वगुणात्मकं ॥ रमारमणमिष्टा
र्थप्रपद्येमध्ववल्लभं ॥ १ ॥ आथर्वणींमंत्रोपनिषदंयथावद्व्याचिख्यासुर्भगवानानंदतीर्थमुनिर्निर्विघ्नपरिसमाप्तिहेतुभूतंतदुक्तगुणव
द्भगवत्स्तुतिनतिरूपंमंगलमादावाचरति ॥ आनंदमिति ॥ आनंदरूपमित्यानंदउक्तः। नित्यंविभुमित्यत्रनित्यता। सबाह्याभ्यं
तरोह्यजइत्यजत्वं। अजत्वान्नित्यत्वादजरं। स्वरूपनित्यत्वेपिगुणद्वारानाशोस्तिकिमित्यतोनेत्युक्तं अच्युतमिति। एतच्चाक्षरंशब्दे
नोक्तं। नित्यानामपिगुणानांह्रासोस्तिकिमित्यतोनेत्युक्तं अक्षयमिति। एतदपितदव्ययमित्यनेनोक्तं। अनंतशक्तित्वंच यथासुदी
प्तादित्यादिनोक्तसृष्ट्यालब्धं। यःसर्वज्ञइतिसर्वज्ञत्वं। संसारश्रांतस्यतन्निवृत्तयेपरमानंदावाप्तयेचब्रह्मविद्यांवक्तुकामऋष्याद्यज्ञा
त्वाविद्याभ्यासिनो योहवाअविदितार्षेत्यादिनानर्थोक्ते रक्षरगणनयाछंदोवगते र्यंयातदक्षरमधिगम्यतइत्यादिनादेवतावगते
श्च तदुभयंविहायऋषीनाहवेदपुरुषोब्रह्मादेवानामित्यादिना। सर्वाविद्यायस्यांप्रतिष्ठंते सासर्वविद्याप्रतिष्ठा तांसर्वविद्याप्रतिष्ठां।
यस्यांलब्धायांअन्याविद्याविदिताःसफलाभवंतीत्यर्थः ॥ १ ॥ अथर्वन्नित्यस्यचतुर्थीअथर्वणइति। प्रवदेतप्रावदत्। अंगी
रितिरेफांतः तस्यचतुर्थीअंगिरइति। भरद्वाजस्यपुत्रोभारद्वाजः। सत्यवहोनामतः। परैवविवक्षाभेदादवरातांपरावरां।
परामपरांचविद्यां। तेचवक्ष्येते पराचैवापराचेति ॥ २ ॥ शुनकस्यापत्यंशौनकः। प्रत्यब्दंयज्ञकृन्महाशालः। कर्मदेवतादिप्र
तिपादकंमयाभ्यस्तं कर्मादिकंचास्वतंत्रं ततोनपुरुषार्थप्रदं। नचाप्रयोजकं। पुरुषार्थहेतुतयावेदाद्युक्तत्वात्। अतःकस्यचि
दंगंकर्मादिकं। तथाचकस्मिन्वस्तुनिविज्ञाते इदंसर्वं कर्मादिकं विज्ञातं विज्ञातफलं भवति। तत्किमितिप्रश्नार्थः ॥ ३ ॥ कर्मा

दिप्रतिपादकत्वेनापरविद्याख्यंऋगादिकंब्रह्मप्रतिपादकत्वेनपरविद्याख्यस्यऋगादेरेवांगमितिपरिहारंहृदिनिधायपरापरविद्ययोरं
गांगिभावस्फोरणायतयोःस्वरूपंनिरूपयितुंप्रस्तावयति ॥ **तस्माइति** ॥ किंसंज्ञकेद्वेविद्येइत्यतउक्तं ॥ **पराचैवापराचेति** ॥४॥
प्रस्ताविताअपरविद्याकेत्यतआह ॥ **तत्रेति** ॥ अयंवर्णःअस्मिन्स्थानेऽनेनप्रयत्नेनोच्चार्यइतिनिरूपकंशास्त्रंशिक्षा । कल्पःसूत्रं ।
शब्दसाधुत्वासाधुत्वज्ञापकंव्याकरणं । निरुक्तंशब्दनिर्वचनकरं । गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगतीनांतत्प्रभेदानांच
छंदसांलक्षणनिरूपकंछंदः । ज्यौतिषंकालनिर्णयकरं ॥५॥ प्रस्तावितांपरविद्यांनिरूपयति ॥ **अथपरेति** ॥ अक्षरस्वरूपंनिरूपय
ति ॥ **यत्तदित्यादिना** ॥ **अद्रेश्यमदृश्यं** । **विभुंसमर्थं** । अक्षरस्यादृश्यत्वेकथंययातदक्षरमधिगम्यतइत्युक्तिरित्यतआह ॥ **यद्भू
तयोनिंपरिपश्यंतिधीराइति** ॥ अधीराणामदृश्यमित्यर्थत्वान्नविरोधइत्यर्थः ॥ ६ ॥ यद्भूतयोनिमित्यक्षरस्यस्रष्टृत्वमुक्तं ।
तत्रसंहर्तृत्वस्यानुक्तत्वादन्यत्संहर्त्रितिप्रतीयते । तांनिवारयन्स्रष्टृत्वसंहर्तृत्वप्रकारंसदृष्टांतमाह ॥ **यथोर्णनाभिःसृजतेगृह्ण
तेचेति** ॥ किमनुसृत्यसृजतीत्यतोदृष्टांतेनाह ॥ **यथापृथिव्यामोषधयःसंभवंतीति** ॥ यथापृथिवी शाल्यादिनानाबीजानि
अपेक्ष्यतत्तदंकुरादीन्जनयति। तथाचेतनानांविविधकर्माण्यपेक्ष्यतत्तत्सृजतीत्यर्थः। तत्तत्स्रष्टृत्वंचनकुलालादिवत्क्लेशेनेतिदृष्टां
तेनाह ॥ **यथासतइति** ॥ सतश्चेतनाधिष्ठितात्पुरुषाद्देहाद्यथाकेशलोमानिअनायासेनभवंति तथा विश्वं जगदपि अनायासे
नाक्षरादिहसंभवतीत्यर्थः ॥ ७ ॥ यद्यप्यूर्णनाभ्युपभुक्तमन्नमेवतंत्वाकारेणपरिणमते नतूर्णनाभिश्चेतनः । तथापियथापृथिव्या
मित्यादिदृष्टांतोक्त्यापरिणामिकर्तृत्वंप्रतीयतेतन्निवारयितुमाह ॥ **तपसेति** ॥ तपसाआलोचनेनज्ञानेनविचारेणेतियावत् ।

चीयतेसंबध्यते ब्रह्म । ज्ञानवतःकारणस्यपरिणामिकर्तृत्वमयुक्तमित्यर्थः । विचारानंतरभाविसृष्टिक्रममाह ॥ ततोन्नमि
त्यादिना ॥ अत्रदेवता जडानिच ग्राह्याणि। कर्मचजातं । कर्मसुनिमित्तेषुअमृतंस्वर्गादिकंचजातमितियोज्यं ॥ ८ ॥ तपसाची
यतइत्युक्त्यापूर्वज्ञानाभावप्रतीतिंनिवारयन्तपसःसंतापात्मकत्वप्रतीतिंचनिवारयति ॥ यःसर्वज्ञइत्यादिना ॥ कस्यादिसृष्टि
रित्यतआह ॥ तस्मादिति ॥ ९ ॥ प्रथमःखंडः ॥ १ ॥ परविद्यायाअपरविद्यांगमित्युक्तंतत्प्रकारंदर्शयति ॥ तदेतत्सत्यमि
त्यादिना ॥ तस्यैवंयोजना। कवयोमंत्रेषुयानिकर्माण्यपश्यन् तानित्रेतायांबहुधासंततानि। सत्यकामाःसत्यस्यज्ञानार्थिनःसंतोयूयं
तान्याचरथ । सत्यंनामकिमित्यतोयदेतदक्षरंप्रकृतंतदेतत्सत्यमिति। कर्मादिकंब्रह्मज्ञानकारणमित्यर्थः। एषभगवज्ज्ञानार्थमनुष्ठि
तःकर्मसंदर्भोलोकेवःसुकृतस्यलोकस्यउपपन्नःपंथाः॥ १ ॥ भगवज्ज्ञानकारणंकर्मेतिप्रकृतं। तदाचरणप्रकारमाह ॥ यदेत्यादिना॥
लेलायते परिवर्तते । आज्यभागावंतरेणाज्यभागयोर्मध्ये ॥२॥ प्रकृतस्याग्निहोत्रस्येतिकर्तव्यतांतदभावेनर्थकथनेनाह ॥ यस्येत्या
दिना ॥ अदर्शपौर्णमासमिति । अमावास्यापौर्णमास्योर्विशेषहोमरहितमित्यर्थः । नूतनधान्यहोमरहितमनाग्रयणं । अहुतंतत्त
त्कालहोमरहितं। अवैश्वदेवंविश्वेदेवपूजारहितं। आसम्यक्ऊर्ध्वान्सप्तमान् (लोकान्हिनस्ति) ऊर्ध्वसप्तलोकप्राप्तिस्तस्यनभवती
त्यर्थः ॥ ३ ॥ कुत्रहोमःकार्यइत्यपेक्षायांयदालेलायतेह्यर्चिरित्युक्तमधिकरणंविवृण्वन्नाह ॥ कालीति ॥ ४ ॥ भ्राजमानास्वे
तासुजिह्वासुविषये । यश्चरतइत्युक्तमाचरणमेवाह ॥ यथाकालमिति ॥ कालमनुसृत्येत्यर्थः । आददायन्आददत् । यथाका
आ०व्या०१२ लंहोतुःफलमाह॥तमिति॥एताःएतेप्रसिद्धाःसूर्यस्यरश्मयःसूर्यरश्मिस्थादेवाः। देवानांपतिरेकोमुख्यःअधिवसंत्यनेनेत्यधिवासः।

मुख्याश्रयइतियावत् । यत्रतत्रतंनयंतीतियोजना ॥ ५ ॥ नयनप्रकारमेवविवृण्वन्नाह ॥ **एहीति** ॥ आहुतयःस्वीकृताहुतयः। एषवःपुण्यइत्यादिकांप्रियांवाचमभिवदंत्योर्चयंत्यःसुवर्चसोदेवताः । स्वाधिष्ठितैःसूर्यस्यरश्मिभिःयजमानंएह्येहीत्युक्त्वावहंतीति योजना ॥ ६ ॥ भगवत्पूजात्मकोपिकृतोयज्ञादिःसफलश्चे(दिरुक्तफलश्चे)त्किमर्थंयज्ञादेस्तत्पूजात्मकत्वेनकरणमित्यतस्तद्रहित स्यस्वरूपंदर्शयति ॥ **प्लवाइत्यादिना** ॥ अष्टादशानामुक्तं अष्टादशोक्तं । अष्टादशचषोडशर्त्विजोयजमानःएतन्निरीक्षकःस भ्यश्च । येषु यज्ञेषु । अदृढत्वमेवस्पष्टमाह ॥ **एतच्छ्रेयइति** ॥ ७ ॥ जंघन्यमानाःवक्रगतयः । तत्रदृष्टांतमाह ॥ **अंधेनेति** ॥ ८ ॥ अविद्यावेष्टितत्वंचनैकप्रकारेणेत्याह ॥ **अविद्यायामिति** ॥ अविद्यावेष्टितत्वादिकंतेषांकुतोभवतीत्यतआह ॥ **यत्क र्मिणइति** ॥ स्वर्गादिरागात्ब्रह्मयन्नप्रवेदयंतिनजानंतितेनकारणेनेत्यन्वयः ॥ ९ ॥ क्षीणलोकाश्च्यवंतइत्युक्तंविशदमाह ॥ **इष्टापूर्तमिति** ॥१०॥ तान्याचरथनियतंसत्यकामाइत्यत्रज्ञानसाधनत्वप्रकारःकर्मादेःकथितः । तंप्रकारंविविच्याह ॥ **तपइति** ॥ तपःश्रद्धे उपवसंत्याचरंति । तपआदिनाअंतःकरणशुद्धिद्वाराविद्वांसोभवंतीत्यर्थः ॥ ११ ॥ कर्मादिप्रतिपादिकाऽपरविद्याभ गवत्पूजात्वेनस्वोक्तानुष्ठानेपरविद्यासाधनमित्युक्तंपूर्वत्र । इदानींतुस्वर्गसाधनत्वेयागादेःसुखरूपत्वात्स्वर्गस्यचाल्पकालीनत्वा न्नस्वर्गोमुख्यपुरुषार्थोतस्तत्रविरक्तोभवेदितिविरक्तिजननेनचपरविद्यासाधनत्वमपरविद्यायाइत्याह ॥ **परीक्ष्येत्यादिना** ॥ कर्म चिताँल्लोकान् । एतेदुःखसाध्याविनाशिनश्चेतिपरीक्ष्य । स्वरूपानंदाविर्भावरूपत्वादकृतोमोक्षःकृतेनकर्मणानास्ति किंतुज्ञानेन । तत्तस्माद्विज्ञानार्थंगुरुमेवाभिगच्छेत् ॥ १२ ॥ शमान्वितायाभगवन्निष्ठायुक्ताया येनयया प्रोवाचप्रवक्ति ॥ १३ खं०२ ॥

तदेतद्वक्ष्यमाणंसत्यं नमिथ्या । गुरूपदेशप्रकारमाह ॥ **यथासुदीप्तादिति** ॥ १ ॥ अक्षरस्यगुणान्वदन्नेवजगतइवतस्यापिन जननादिमंतव्यमित्याह ॥ **दिव्यइति** ॥ २ ॥ विश्वमितिकाचिद्देवता । वायुशब्देनप्राणोवायुरितिमुख्यप्राणस्योक्तत्वात् । आपः पृथिवीतिपृथिव्युत्पत्तिरुक्तासाकस्मादंगादित्यतआह ॥ **पद्भ्यांपृथिवीति** ॥ ४ ॥ यश्चसूर्यस्तस्मात्सोमाच्च । पर्जन्यौषधयः पृथिव्यांजाताः । अंगादुत्पत्तिमुक्त्वापुरुषात्स्त्रियामुत्पत्तिमाह ॥ **पुमानिति** ॥ बह्वीःबह्व्यः ॥ ५ ॥ क्रतवःपशुबंधयुक्तः॥ ६ ॥ नचैतस्माज्जायतेप्राणइत्यनेनपुनरुक्तिः । सप्तप्राणाइत्यस्यअत्रस्त्रियामुत्पत्त्युक्तेः । समिधोविषयाः ॥ ८ ॥ सर्वरूपाःसर्वदिङ्मुखाः ॥ ९ ॥ सृष्टिकर्मज्ञानादेर्भगवतोनित्यत्व(भिन्नत्व)शंकांनिवारयंस्तस्यतदैक्यमाह ॥ **पुरुषइति** ॥ विश्वंसर्वंइदमित्युक्तंवि शदयतोक्तं विश्वंकर्मतपइति ॥ १० ॥ खं० ३ ॥ आविरित्यादिनाप्युपदेशप्रकारएवोच्यते । पद्यतेप्राप्यतइतिपदं । एजत्चे ष्टमानं । प्राणत्जीवत् । निमिषत्अक्षिपक्ष्मचलनवत् ॥ १ ॥ सदसद्वरेण्यंकार्यकारणाभ्यांश्रेष्ठं । प्रजानांचवरिष्ठं ॥२॥ वेद्धव्यंवि द्धिवेधयेत्युक्तंवेधप्रकारमाह ॥ **धनुरिति** ॥ औपनिषदंउपनिषत्सिद्धं ॥ ४ ॥ किंचधनुःकश्चशरइत्यतआह ॥ **प्रणवइति** ॥ तन्मयःतस्मिँल्लग्नः ॥ ५ ॥ यथाक्षरंप्राधान्येनध्येयंतथान्यदप्यस्तिकिमित्यतस्तन्महिमपूर्वनेत्याह ॥ **यस्मिन्द्यौरिति** ॥ ६ ॥ संहताःसंबद्धाः । विश्वादिरूपेणबहुधाजायमानः ॥७॥ यस्य यःसर्वज्ञइत्यादेरेषमहिमाभुविभूम्यादौप्रकटितःतमात्मानंध्यायत । तथासतितमसःपरस्तात्पराय वःस्वस्ति ॥ ८ ॥ ध्यानस्थानमाह ॥ **दिव्यइति** ॥ ब्रह्मपुरेदेहे । दिव्येशरीरकोशेपिस्थानविशेषमाह ॥ **व्योम्नीति** ॥ व्योम्निआकाशे ॥९॥ **मनोमयोज्ञानमयइति** ॥ अन्ने शरीरे । हृदयंसन्निधायअधिष्ठायस्थितः । तस्यदर्शनायोग्य

त्वेतद्ध्यानंव्यर्थमितिनमंतव्यमित्याह ॥ तदिति ॥ १० ॥ तद्दर्शनेनकिंभवतीत्यतःसंसारकारणाविद्याग्रंथ्यादिरपगच्छतीत्याह
॥ भिद्यतइति ॥ ११ ॥ एवंशरीरेउपास्तिस्थलमुक्त्वाब्रह्मांडमध्यस्थितसूर्याख्योपास्तिस्थलमाह ॥ हिरण्मयइति ॥ कोशे
ब्रह्मांडे ॥ १२॥ सर्वसूर्यादिप्रकाशप्रकाश्यं ब्रह्मस्वरूपंतुकथमित्यतःस्वप्रकाशमित्याह ॥ नतत्रेति॥ नकेवलंसूर्यादितेजोनब्रह्मप्र
काशकंकिंत्वन्यत्रापिप्रकाशकत्वंतदधीनमित्याह ॥ तमिति॥ सूर्यादीनांतदनुप्रकाशत्वंचनस्वातंत्र्येणेत्याह ॥ तस्येति ॥१३॥
हृदयेसूर्येचतिष्ठतीत्युक्त्यापरिच्छिन्नत्वंप्रतीयते तन्निवारयति॥ब्रह्मेति॥ इदममृतंब्रह्मैवपुरस्तादित्यादिपृथग्वाक्यतयायोज्यं। ब्रह्म
शब्दबाहुल्यात् ॥१४॥ खं०४॥ सएषोंतश्चरतेबहुधाजायमानइत्युक्तंबहुधाजायामानत्वंकिंजीवात्मकत्वेन नेतिभावेनतयोर्भेदमाह
॥ द्वेति ॥ उपकार्योपकारकभाववत्तयापरस्परमपरिहारेणवर्तमानौसयुजौ। जीवस्यसंसारकारणमविद्यादिकमुक्तं प्रधानकारणमाह॥
समानइति ॥ १ ॥ तस्यशोकनिवर्तकंकिमित्यतोभेदपूर्वंतन्महिमज्ञानमित्याह॥ जुष्टमिति ॥ इति पूर्वोक्तप्रकारेणास्यमहिमानंच
यदापश्यतितदावीतशोकोभवति॥२॥ पूर्वमंत्रार्थमेवविशदमाह ॥ यदेति ॥३॥ पुण्यपापेविधूयनिरंजनइतिजीवन्मुक्त्यवस्थासूचि
ता। तत्प्रकारमाह॥ प्राणइति ॥ योजनातु विद्वानतिवादीनभवति। कस्मा त्सर्वभूतैरिंद्रियादिभिरेषमाणएवविभाति। अहमस्व
तंत्रइतिविजानन्यतः । अतिवादीनचेत्कथंतिष्ठतीत्यतआह ॥ आत्मक्रीडइति ॥ ४ ॥ प्रकृतेश्वरप्राप्तेःज्ञानंसाधनं ज्ञानस्य
ध्यानंसाधनमुक्तंतत्सहकारीण्याह ॥ सत्येनेति ॥ ब्रह्मचर्येणगुह्येंद्रियनियमेन । क्षीणदोषत्वंचकारणांतरमितिसूचयति ॥ क्षी
णेति ॥ ५ ॥ तत्सर्वथाभाव्यंमुमुक्षोरित्याशयेनसत्यंस्तुवंस्तद्भावेपीश्वरबहिर्मुखस्यनमोक्षइत्याह ॥ सत्यमिति ॥ सत्यनिष्ठइ

त्यर्थः ॥ यत्रलोकेसत्यस्यपरमात्मनःपरमंसन्निधानंतंलोकंप्रतियेनपथाआप्तकामाऋषयःआक्रमंतिगच्छंति । अयंपंथाःसत्येनवित
तः ॥ ६ ॥ सत्येनपंथावितत इतिसत्यंमोक्षदात्रित्युक्तं तस्यकोतिशयोयेनमोक्षदातृत्वमित्यतआह ॥ बृहद्दिति ॥ ७ ॥ चक्षुरा
दिदेवोपास्तिप्रभावात्भगवज्ज्ञानंभवतिकिमित्यतोनेत्याह॥ नचक्षुषेति ॥८॥ तंपश्यतइत्युक्तंचक्षुरादिभिर्नपश्यतिचेत्कथंतर्हि
ज्ञानप्रसादेनेत्युक्तंमनसाचेत्याह ॥ एषइति ॥ योजनातु प्रजानांसर्वंचित्तंप्राणैःसहयस्मिन्विशुद्धेप्राणेओतंसएषआत्मास्वामी
प्राणोयस्मिन्पंचधासंविवेशआश्रितस्तिष्ठतिविभवतिच । सएषोणुःपरमात्माचेतसावेदितव्यइति ॥ ९ ॥ प्रकृतजीवन्मुक्तस्यव
स्थाप्रकारमेवाह ॥ यंयमिति ॥ संविभाति भावयतीच्छतीतियावत् ॥ १० ॥ खं० ५ ॥ आत्मज्ञार्चकःभूतिमान्भवतीत्युक्तां
भूतिमेवाह ॥ सवेदैतदिति ॥ अकामाःशुक्रंगंतुंअन्यत्अतिवर्तंते ॥ १ ॥ अकामाइत्यस्यव्यावर्त्यमाह ॥ कामानिति ॥ का
मान्भद्रान्मन्यमानः ॥ २ ॥ नचक्षुषापश्यतीत्यत्रान्यसामर्थ्याद्भगवंतंनपश्यति किंतुज्ञानप्रसादेनेत्युक्तंविशदमाह ॥ नायमि
ति ॥ ३ ॥ तर्हिप्रवचनादेर्वैयर्थ्यंकिंनेत्याह ॥ नायमिति ॥ बलहीनेनश्रवणमननबलहीनेन । अलिंगात्प्रमाणानुक्तात् ॥ ४ ॥
विशतेब्रह्मधामेतिआत्माज्ञायतइत्युक्तं तज्ज्ञानमहिमानमाह ॥ संप्राप्येति ॥ ५ ॥ मोक्षःकिंज्ञानानंतरमेवभवतिनेत्याह ॥ वे
दांतेति ॥ वेदानांअंतात्युक्त्यनुसंधानरूपात्जातविज्ञानेनसम्यग्विषयीकृतार्थाः । परामृतात् प्रकृतेः ॥ ६ ॥ मुक्तिप्रकारंदर्श
यति ॥ गताइति ॥ ७ ॥ एकीभवनप्रकारमेवदृष्टांतेनाह ॥ यथानद्यइति॥ अस्तमदर्शनं ॥ ८ ॥ एतदुपनिषद्वेत्तुःफलमाह
॥ सयइति ॥ ब्रह्मैवभवतीत्युक्तंब्रह्मभवनमेवविशदमाह ॥ तरतीत्यादिना ॥ ९ ॥ अस्यामुपनिषदिकोधिकारीत्यतःश्लोके

नवदन्नाह ॥ **तदेषश्लोकइति** ॥ श्रद्धयंतः । एकप्रकारेणश्रद्धापूर्वमर्चयंतः ॥ १० ॥ स्वोक्तमृषिणोक्तमित्याह ॥ **तदेतदि
ति** ॥ तदेतदृष्युक्तंसत्यमित्यर्थः । वेदपुरुषःउपनिषदंऋषिप्रणामेनसमापयति ॥ **नमइति** ॥ **इत्याथर्वणोपनिषन्मंत्रार्थः** ॥७॥
अथभाष्यार्थः ॥ अथर्वायज्येष्ठपुत्रायेतिअथर्वणोब्रह्मणोज्येष्ठपुत्रत्वमुक्तं । तद्रुद्रादेःप्रथमपुत्रत्वोक्त्याविरुद्धमतोविरोधंव्यवस्थो
क्त्यापरिहरति ॥ **मनोरिति** ॥ वैवस्वतस्यमनोरंतरे अथर्वाआदौब्रह्मणोऽजनि । अथोअनंतरमेवमित्रादयश्चजाताः । वाराहे
कल्पे । प्रथमइतिग्राह्यं । यथासनकादीनांप्रथमजत्वंकल्पांतरेतथाकिंब्रह्मणोपिविष्णोःप्रथमजत्वमित्यतआह॥ **ब्रह्मेति** ॥ १–४॥
तत्रापराऋग्वेदोयजुर्वेदइत्युक्त्वाअथपराययातदक्षरमधिगम्यतइत्युक्तत्वादृगादिव्यतिरिक्तापरविद्येतिप्रतीयते । परैस्तथाव्या
ख्यातत्वाच्चातस्तांनिवारयन्नाह ॥ **ऋगाद्याइति** ॥ आपाततःप्रतीतार्थतयायदाविष्णोःनवाचकाः । परमयोगरूढ्यावाच
काःऋगादयःसाकल्येनभगवत्प्रतिपादकाइत्युक्तंतत्प्रमाणैर्द्रढयति ॥ **ऋग्भिरिति** ॥ हौत्रेण हौत्रेकर्मणि । स्तुवंति । सामभि
रितिशेषः । एवंभूतास्तेभागवतोत्तमाइतिसंबंधः । ननूदाहृतप्रमाणेनवेदादेर्नसाकल्येनभगवत्परत्वंसिध्यति । होत्रादयःइंद्रादि
वत् भगवत्परवाक्येनशंसनंकुर्वंतीत्यर्थोपपत्तेरित्यतोनिरवकाशप्रमाणानिपठति ॥ **वेदइति** ॥ एतद्ब्रह्मैवांतादावुक्त्वाविजानता
मेवेत्यन्वयः। इतिहासपुराणानांपंचमत्वेनऋगादिपंचधासंस्थं। वाकानुवाकायजुर्वेदवाक्यविशेषाः। निषदित्याथर्वणवाक्यविशेषाः।
सत्येषु यथार्थप्रतिपादकेषु। आमनंति प्रतिपादयंति। सर्वाणितपांसिचयत्प्रतिवदंति । ऋगादयएवभगवत्प्रतिपादकाःपरविद्यानातो
न्यास्तीत्यत्रप्रमाणांतरंचाह ॥ **चतुर्दशेति** ॥ पुराणन्यायमीमांसाधर्मशास्त्रंचेतिचत्वारि षडंगानि ऋगाद्याश्चत्वारइतिचतुर्दशमहा

विद्याःपरविद्याचेत्येकोर्थः । अतःप्रकृतेर्थेमानंभवति। विप्रतिपत्तिभावात्तत्रैवमानांतरंपठति ॥ **पंचरात्रमिति** ॥ एतत्सर्वंएकमेकवि
षयं । कथमेकंपुराभवत् इंद्रादिनाम्नामिंद्रादिवाचकत्वादित्यतआह ॥ **नैवेति** ॥ तर्हिवेदैर्हरिरेवेज्यःनत्वन्यइतिप्राप्तमित्यतःसत्यमि
त्याह ॥ **देवतात्वेनेति** ॥ तर्हिब्रह्मादियजनाभावःप्राप्नोतीत्यतआह॥ **ब्रह्माद्याइति**॥ भगवत्पूजाकारित्वेन।तस्माद्देवतात्वेनभगव
त्पूजाकर्तृत्वात् । तस्माद्वेदेप्रतिपाद्यभेदाभावात्परविद्यापरविद्येतिपारावर्यंकिंचननास्ति । वक्तृभेदाभावाच्चपारावर्यंनास्तीत्याह॥
यस्मादिति ॥ सर्वैर्वेदैर्हरियजनस्यकर्तृत्वेवृद्धकृतिंचाह ॥ **तस्माद्ब्रह्मादयइति** ॥ तर्हिसर्वैर्वेदैर्हरियजनेऽशक्तस्यतत्रतूष्णीं
भावःप्राप्तइत्यतआह ॥ **अशक्तइति** ॥ भिन्नैर्ऋगाद्यैरितित्रेतायांवेदेभेदउक्तः तमेवविशदमाह ॥ **एकइति** ॥ कृतेसर्ववेदैर्हरिं
यजंति त्रेतादौऋगाद्येकदेशेनेत्युक्तं । एवंतर्हित्रेतादावपिसर्ववेदैर्हरियजनेशक्तस्यऋगाद्येकदेशेनहरिपूजामुख्याकिमित्यतोनेत्याह
॥ **मुख्यइति** ॥ त्रेतादावपिसर्ववेदैर्हरियजनस्यधर्मत्वेकथंऋगाद्यैरेवसत्रैतैरित्यादिनाविभज्यधर्मोक्तिरित्यतोशक्तविषयत्वान्नविरो
धइत्याह ॥ **त्रेतादाविति** ॥ तात्पर्यद्योतनायोक्तंपुनरेवाह ॥ **कृतइति** ॥ वेदःपुरुषशक्त्यल्पत्वापेक्षयात्रेतादौशब्दतोर्थतश्च
ह्रसतीत्युक्तं । तत्रभारतवचनंपठति ॥ **वेदवादाइति** ॥ ऋगादीनामेवपरविद्यात्वे नप्रमदितव्यमितिभावेनतत्रमानांतरंपठति॥
वेदैरिति ॥ एतदुपनिषदःपूर्वोत्तरपर्यालोचनयाऋगादेरेवविवक्षाभेदेनपरविद्यात्वंसमर्थयते ॥ **अत्रापीति**॥मंत्रात्मिकामेवकर्म
विषयामितिग्राह्यं । आथर्वणान्मंत्रानेव । इतोपिऋगादयएवविवक्षाभेदेनपरविद्याःनकेवलमुपनिषदित्याह ॥ **चतुर्वेदेति** ॥ च
तुर्वेदसंस्कारवतांस्वशाखाध्ययनार्थंकृतसंस्कारवतामेवस्वशाखोपनिषद्विद्यायामधिकारउक्तः । संहितोपनिषदोर्भिन्नविद्यात्वे

कार्यैक्यंनस्यादित्यर्थः । संहिताध्ययनसंस्कारएवोपनिषदादिसर्ववेदसंस्कारइतिकुत्रोक्तमित्यतस्तद्वाक्यंपठति ॥ तेषामि
ति ॥ अत्रस्वशाखासंहिताध्ययनार्थंचीर्णशिरोव्रतेनस्वस्वशाखोपनिषदाद्यधिकारोस्तीत्येतत्सर्ववेदाध्ययनाधिकारोस्तीत्येत
स्योपलक्षणत्वेनोक्तमित्यर्थः । उपलक्षणत्वेनोक्तमितिकुतोवगतमित्यतस्तज्ज्ञापकंप्रमाणंपठति ॥ स्ववेदेति ॥ तपसा
चीयतेब्रह्मेत्युक्तंब्रह्मतस्मादेतद्ब्रह्मनामेत्युक्तमितिप्रतीतिंनिवारयति ॥ एतद्ब्रह्मचतुर्मुखइति ॥ खं० १ ॥ तदेतत्स
त्यंमंत्रेष्वित्यत्रसत्यंयथार्थमितिप्रतीयते तान्निवारयति ॥ तदेतदिति ॥ सत्यकामाइत्यत्रापिअन्यथाप्रतीतिंनिवारयन्अ
न्वयंदर्शयन्अभिप्रायमाह ॥ तदिति ॥ तत्कामाःसत्यनामकभगवत्कामाः । प्लवाह्येतेअदृढायज्ञरूपाइत्यत्रकर्मणांनिंदि
तत्वात् । भगवत्कामाःकर्माण्याचरेथेतिकथंव्याख्यानंयुक्तमित्यतस्तस्यभावार्थमाह ॥ अन्यथेति ॥ कर्मणांभगवद्विषय
त्वाभावेइत्यर्थः । एषवःपुण्यइत्यत्रयज्ञादिसामर्थ्यादेवब्रह्मलोकोभवतीतिप्रतीयतेतांनिवारयन्नाह ॥ भगवदिति ॥ कृतेक
र्मणीतिशेषः । ब्रह्मलोकःचतुर्मुखलोकइतिप्रतीतिंनिवारयति ॥ परेति ॥ भगवद्विषयतयाकर्मकर्तुःपरब्रह्मप्राप्तिर्भवतीति
कुतःसिद्धं । येनकर्मतथाकरणीयमित्यतआह ॥ निष्काममिति ॥ कर्मेतिग्राह्यं । तत्रैवार्थेश्रुतिंपठति ॥ सयइति ॥ लोकमा
श्रयं । ननुमुमुक्षोःकर्मैवनापेक्षितं मोक्षस्यनैष्कर्म्यसिद्धत्वादित्यतआह ॥ सहेति ॥ सहयज्ञाइत्युपक्रम्यस्वकर्मकर्तुश्चक्रप्रवर्तकत्वे
न मुच्यंतेतेपिकर्मभिरितिफलमुक्त्वा एवंप्रवर्तितंचक्रमितिस्वकर्माकरणेन चक्राप्रवर्तकस्यानिंदितत्वाच्चनमुक्तेःकर्मानपेक्षेत्यर्थः ।
मुमुक्षोर्ब्रह्मप्राप्त्यैसर्वथाकर्मणाभाव्यमित्येतत्प्रमाणांतराभ्यांसमर्थयते ॥ यांतीति ॥ अहंहीति ॥ यद्वास्वकर्मभगवद्विषयंकृ

तंतत्प्राप्तिकारणमित्येतत्प्रमाणाभ्यांद्रढयन्नाह ॥ **यांतीति** ॥ **अर्हंहीति** ॥ ननुमुमुक्षोर्ज्ञानिनःस्वकर्मनापेक्षितं । तस्ययस्त्वा त्मरतिरेवस्यादित्यत्रतन्निषेधादिति । मैवं । तस्यमुक्तविषयत्वात् । कुतएवंकल्प्यमित्यतआह ॥ **यस्त्विति** ॥ यस्त्वात्मरातिरित्यु क्त्वाप्युत्तरत्रकुर्याद्विद्वानित्युक्तत्वात्तन्मुक्तविषयमवगम्यतइत्यर्थः । कुर्याद्विद्वानितिविधिसरूपं नविधिः । अकरणेबाधकाभावा दित्यतआह ॥ **येत्विति** ॥ ननुमुमुक्षोःकर्मणःकर्तव्यत्वेयत्याश्रमिणस्तदभावात्तस्यमोक्षोनस्यादित्यतोविरोधंव्यवस्थापकवाक्यंप ठित्वाशमयति ॥ **लोकइति** ॥ अस्मिँल्लोके द्विविधामुमुक्षुजनाःसंति । ज्ञानयोगिनःकर्मयोगिनश्चेति । ज्ञानप्रचुरयोगेनसांख्या नांसनकादीनांज्ञानयोगिनांनिष्ठापुरामयाप्रोक्ता । कर्मप्रचुरयोगेनजनकादीनांकर्मयोगिनामितिनिष्ठाद्वयस्योक्तत्वात् यतेरपि स्वाश्रमोचितकर्मभावान्नोक्तविरोधइत्यनुवदंस्त्रेतायामित्यस्यव्यावर्त्यमाह ॥ **त्रेतायामिति** ॥ एकप्रकारेण एकविषयकत्वे न । एकप्रकारेणसंततत्वंसाधितमपिप्रसंगात्प्रमाणांतरेणद्रढयति ॥ **अग्निष्टोमेति** ॥ ननुकथंकृतेकर्मणामेकविषयत्वेनसंततत्वं । इंद्रादिनामभिर्यजनादित्यतआह ॥ **यमिंद्रमिति** ॥ एभ्यः एभिर्देवैःसह । तस्मैजुहोमि । इंद्रादिनाम्नांविष्णुवाचकत्वाद्देवादीनां कंचुकमात्रत्वात्कर्मणामेकविषयत्वंयुक्तमित्यर्थः । इमंलोकंहीनतरंवालोकंविशंतीत्यस्यैकविषयत्वमगम्यतेतदयुक्तंहीनोत्तमत्वा ल्लोकयोः । अतःकइमंलोकंविशतिकोवाहीनतरंइत्यतआह ॥ **विष्णोरिति** ॥ उक्तार्थंप्रमाणेनद्रढयति ॥ **देवेभ्यइति** ॥ त्रैवि द्यामामित्यत्रमांसम्यक्ज्ञात्वायजतामपिमर्त्यलोकप्राप्त्युक्तेः राजवद्यस्तुमन्यते । याजीसमानुषंयातीतिविशेषोक्तिरयुक्तेत्यत आह ॥ **त्रैविद्याइति** ॥ त्रैविद्यामामितिवाक्येउक्तास्तुत्रैविद्याअज्ञानपूर्वयाजिनः । कुतः । येप्यन्यदेवताभक्तास्तेपिमामे

वयजंतिकिंतुअविधिपूर्वकंयजंति । कथमविधिपूर्वकत्वंयजनस्येत्यतोऽहंहिसर्वयज्ञानांभोक्ता नतुमामभिजानंतितत्वेनातश्च्यवं तितेइत्युक्तत्वादितियोजना।अज्ञत्वाद्यजनान्मर्त्यलोकप्राप्तिःअतोविशेषोक्तिर्नायुक्तेतिभावार्थः॥खं०२॥अक्षरात्परतइत्युक्तंपरतोक्ष रात्परत्वं ययातदक्षरमधिगम्यतइत्युक्ताक्षरादितिप्रतीयते । तदयुक्तं तस्यपरविद्याविषयत्वादतोविरोधंव्यवस्थापकप्रमाणेनप रिहरति ॥ **अपरमिति** ॥ परतोक्षरात् । अग्निर्मूर्धेतिसामानाधिकरण्यप्रयोगादैक्यप्रतीतिंनिवारयति ॥ **विष्णिवति** ॥ उप निषदंतरेद्यौर्मूर्धेतिपाठभावात्तदनुसार्येवैतद्वचनमितिज्ञातव्यं । अनेनभगवतोमूर्धाग्निरग्निनामकः । अग्निश्चभगवन्मूर्ध्निअग्निना मकेजातत्वादग्निनामेत्यादियोजनासूचिताभवति । पुमान्रेतःसिंचतीत्यस्यप्रकृतसृष्ट्यासंगत्यभावप्रतीतिंनिवारयन्नाह ॥ **वासु देवइति** ॥ अप्रतीतेरर्चिर्होमलोकगुहाशयाशब्दानामर्थानाह ॥ **सप्तेत्यादिना** ॥ इंद्रियवृत्तयः समिदाख्यविषयसंबंधाः । बुद्धौबुद्ध्यर्थं । सप्तमीत्वेगुहाशयायामितिस्यादित्यतआह॥**लोपइति**॥ समानेवर्णेपरतःपूर्वस्यलोपोभवति । सप्तसप्तेतिवीप्सायां। अन्वयंप्रदर्शयति॥ **प्रतिपुरुषमिति**॥बुद्ध्यर्थंप्रतिपुरुषंसप्तसप्तनिहिताइत्यन्वयः। पुरुषएवेदंविश्वंकर्मेत्यत्रेदंविश्वंजगत्तत्कर्मादि चब्रह्मेतिप्रतीयतेतांनिवारयंस्तदर्थमाह॥ **भगवतइति** ॥ भगवच्चेष्टादेस्तत्स्वरूपत्वंसमाख्याश्रुतिस्मृतिभ्यांसमर्थयते ॥ **यैषे ति** ॥ **स्वाभाविकीति** ॥ खं० ३ ॥ परंविज्ञानादित्युक्तंविज्ञानंकिमितिनज्ञायतेऽतस्तदाह ॥ **विज्ञानादिति** ॥ ब्रह्मणोवि ज्ञानशब्दवाच्यत्वंहरेस्तत्परत्वंचकुतःसिद्धमित्यतस्तत्रप्रमाणसंमतिमाह ॥ **नाभीति** ॥ सप्राणस्तदुवाङ्मनइत्यत्रप्रसिद्धप्राणाद्ये कत्वप्रतीतिंनिवारयन्प्राणादिशब्दान्निर्वक्ति ॥ **प्राणइति** ॥ अमृतस्यैषसेतुरित्यत्रजडामृताश्रयत्वप्रतीतिंनिवारयन्नाह ॥ **अमृत स्येति** ॥ सेतुराश्रयः । तत्रामृतशब्दोक्तामुक्ताइतिकुतइत्यतआह ॥ **ॐमुक्तेति** ॥ यस्मिन्द्यौःपृथिवीचांतरिक्षमित्यत्रपृथिव्या द्याश्रयत्वेनोक्तःपरमात्मेतिकुतइत्यतःमुक्तप्राप्यत्वलिंगोक्तेरितिसूत्रकृतोक्तत्वादित्यर्थः । भवेदेतद्भगवतोमुक्ताश्रयत्वंयदिसिद्धं स्यात् तदेतत्कुतइत्यतआह ॥ **मुक्तानामिति** ॥ परमात्मैवजाग्रत्स्वप्नसुषुप्त्यवस्थासुबहुधाजायमानोजीवःसन्शरीरांतश्चरती तिप्रतीतिंनिवारयंस्तद्वाक्यंव्याचष्टे ॥ **हृदयस्थइति** ॥ ब्रह्माद्यात्मकत्वेनपरेऽस्मदाद्यात्मकत्वेनावरइत्यन्यथाप्रतीतिंवारयंस्तत्पदं व्याचष्टे॥ **पराइति** ॥ हिरण्मयइत्यत्रज्योतिषांज्योतिरितिसूचितंब्रह्मोपास्तेरधिष्ठानंकिमित्यतस्तद्वाक्यंव्याचष्टे॥ **ब्रह्मांडेति**॥ नतत्रसूर्योभातीतिसूर्यादयस्तदेकीभूतत्वात्पृथक्नभांतीतिप्रतीतिंनिवारयति ॥ **सूर्यादयइति** ॥ ब्रह्मैवेदंविश्वमिदंवरिष्ठमित्येत द्ब्रह्मणोविश्वाकारत्वप्रतीतिंनिवारयन्व्याचष्टे ॥ **इदमिति** ॥ इदंविश्वंब्रह्मैवेतिइदंशब्दोजगत्परएवकस्मान्नस्यादित्यतआह ॥ **इदंशब्दानामिति** ॥ जगत्परत्वेएकेनैवपूर्णत्वादितरवैयर्थ्यमितिभावः ॥ खं० ४ ॥ तयोरन्योजीवःस्वाद्वेवपिप्पलंदेहाख्या श्वत्थवृक्षस्यपुण्यकर्मफललक्षणंफलमत्ति नत्वस्वादुपापफलंदुःखमितिप्रतीतिंनिवारयन्व्याचष्टे ॥ **स्वादुवदिति** ॥ अस्वाद्वे वस्वादुवदत्ति । नतुस्वाद्वेवात्तीत्यर्थः । कुतोनजीवःस्वाद्वेवात्तीत्यतआह ॥ **तस्येति** ॥ तस्यार्थः योऽग्रे श्रेष्ठः । तस्यैवस्वादु पिप्पलमाहुः । यःउत् उत्कृष्टं । पितरंनवेद अतएवनशत्नाशवान्तस्यतत्स्वादुपिप्पलंनेति । अनश्नन्नितिसर्वथाऽभोक्तेतिप्र तीयते । तांनिवारयति ॥ **जीवाद्यंदुःखमिति** ॥ नतुनाश्नात्येवेतिकुतइत्यतआह ॥ **तस्येति** ॥ तर्हिश्रुत्योर्विरोधःप्राप्तइत्य तोविरोधंपरिहरति॥ **स्वातंत्र्येणेति** ॥ अनीशयास्वस्यानीश्वरत्वभावनयेतिप्रतीतिंनिवारयन्तत्प्रमाणेनव्याचष्टे॥ **नास्तीति** ॥

कुतःपरमात्माजीवादन्यइत्यतःप्राप्तमीशमिति तद्व्याचष्टे ॥ **जीवादन्यइति** ॥ यतःस्वतंत्रोऽतोजीवादन्यइतियोज्यं । पुण्य
पापेइतिसर्वपुण्यपापविधूननप्रतीतिंनिवारयन्नाह ॥ **पुण्यंचानिष्टमिति** ॥ इष्टपुण्यविधूननस्यज्ञानफलत्वानुपपत्तेरितिभावः ।
सत्यमेवंजयतिनानृतमित्येतत्प्रसिद्धसत्यानृतपरत्वप्रतीतिंनिवारयन्व्याचष्टे ॥ **सत्यइति** ॥ एकस्यैकदैवसमीपस्थत्वदूरस्थत्वेक
थं विरोधादित्यतस्तंविरोधंपरिहरति ॥ **सर्वगत्वादिति** ॥ नचक्षुषागृह्यतेनापिवाचेत्येतच्चक्षुरादिप्रतीतिंनिवारयन्व्याचष्टे ॥
नान्यैरिति ॥ ज्ञानप्रसादेनमनसाचपश्यतीत्येतत्प्रसिद्धज्ञानमनःप्रतीतिंनिवारयन्व्याचष्टे ॥ **ज्ञानरूपेणेति** ॥ निष्कलमित्ये
तत्करचरणाद्यभावप्रतीतिंनिवारयन्व्याचष्टे ॥ **षोडशेति** ॥ करचरणादिराहित्यमेवार्थःकिंनस्यादित्यतोबाधकमाह ॥ **यदेति** ॥
खं० ५ ॥ सवेदैतदित्यत्रतच्छब्दपरामृष्टःकइत्यतआह ॥ **प्रधानमिति** ॥ आविष्टोभवतीत्युक्तमावेशमेवविशदमाह ॥ **नित्य
मिति** ॥ प्राणस्यप्रधानधामत्वात्प्राणद्वाराज्ञानदातृत्वरूपत्वादावेशस्यनोक्तविरोधइतिभावः । ननुपूर्वसतएवकिंचिदतिशयकर
णेनाविष्टव्यवहारगोचरत्वंकुत्रदृष्टमित्यतआह ॥ **सन्निधानमिति** ॥ पूर्वोपिरवधारणार्थः । तथासतियोजना। पुरुषेषुसन्निधानं
प्राप्ताएवपिशाचाःस्वतःस्थित्वाविषयान्भुंजानाअपिपुनश्चतेमंत्रादिभिराविशंतीतियथातथाविष्णुरित्यादि । एतच्छुक्रंशोकरहितं
अतिक्रम्यवर्ततइत्यन्यथाप्रतीतिंनिवारयति ॥ **एतदिति** ॥ प्रति गंतुमितिशेषः । शुक्रमतिवर्ततइत्येवार्थःकिंनस्यादित्यतोबाध
कमाह ॥ **सर्वमिति** ॥ तेसर्वगमितिवाक्यंअर्थाप्रतीतेर्व्याचष्टे॥ **सर्वतइति** ॥ अपियंति प्रविशंति । उक्तमर्थंप्रमाणेनदृढयति ॥
देहादेरिति ॥ तेब्रह्मलोकेषुमुच्यंतइत्यन्यथाप्रतीतिंनिवारयन्व्याचष्टे ॥ **ब्रह्मेति** ॥ एकीभवंतीत्येतत्ऐक्यप्रतीतिंनिवारयन्

व्याचष्टे ॥ अविरोधइति ॥ कुतःस्वरूपयोर्नैकीभावोर्थइत्यतःच्विप्रत्ययलब्धामुपपत्तिमाह ॥ कुतइति ॥ प्रागेकत्वेनाभू
तस्यपश्चादेकत्वभवनंकुतःस्यान्नकुतोपीत्यर्थः । नन्वनेनोत्तरत्रापिजीवःपरमात्मनोभिन्नःपूर्वंततोभिन्नत्वादित्युक्तंभवति । तस्ये
श्वररूपेष्वनैकांत्यमित्यतस्तत्परिहरति ॥ स्वरूपस्यैक्यमेवहीति ॥ पूर्वमपितेषांस्वरूपैक्यमेवहि । अतस्तत्रनोक्तहेतुवृत्तिरि
तिभावः । तर्ह्येकीभाववाक्यानांकागतिरित्यतोऽविरोधादित्युक्तंदृष्टांताभ्यामाह ॥ अतइति ॥ पूर्वंभिन्नस्यपश्चादैक्यायोगान्न
दीनांअब्धिना जीवानांहरिणाचैकीभावस्तुसंश्लेषः । परस्परविरुद्धानांनरांतरैरेकीभावो विरोधस्यवर्जनमित्यर्थः । हेतुमेवविव
रितुमाह ॥ स्वरूपैक्यमिति ॥ पूर्वं नित्यभिन्नस्वरूपिणां । नन्वेकीभावोनामसंश्लेषएवनत्वैक्यमितिनयुक्तं । हरेरूपाणांएकीभा
वोक्तेरैक्यार्थत्वस्यांगीकर्तव्यत्वादित्यतआह ॥ हरेरपीति ॥ हरेरूपाणामेकीभावोयदोच्यतेतत्रापिसंश्लेषएवोच्यते । नत्वैक्यमि
तिकुतइत्यतआह ॥ सिद्धत्वादिति ॥ पूर्वमेवतेषांस्वरूपैक्यस्यसिद्धत्वात्पश्चात्स्वरूपैक्यस्यनोभवः। अतःसंश्लेषएवभगवद्रूपाणां
एकीभावोक्तेरर्थइत्यर्थः । गताःप्राप्ताइत्यन्यथाप्रतीतिंनिवारयंस्तस्यवाक्यस्ययोजनाप्रकारंदर्शयति ॥ गताइति ॥कलादेवादिदे
वाःसंसारिणःप्रतिष्ठाःनियामकाःसंतःतन्मुक्त्यवसरेमुक्ताःसंतःमुक्तस्यापितस्यनियामकास्तिष्ठंतीतिभावार्थः ॥ वाक्यार्थंप्रमाणेन
द्रढयति॥प्रतिबिंबइति ॥कलाःकलादेवताः। मुक्तेष्वपीत्युत्तरत्रापिशब्दसंबंधः।ननुकर्मणोपिकलात्वात्षोडशेत्यनुक्त्वापंचदशे
त्युक्तिःकस्मादित्यतआह ॥ कलाभ्यइति ॥ गतामुक्ताइतिस्वव्याख्या। अन्येषांतुकलाजडरूपाःजीवेभ्यःमुक्त्यवसरेगताभविष्यं
ति । सर्वदेवाश्चप्रतिदेवतासुस्वमूलरूपेषुगताभविष्यंतीति । तांदूषयति ॥ अन्यथापव्याख्यानइति ॥ प्रतिदेवतास्वित्यस्यप्र

तिबिंबभूतास्वितिस्वव्याख्यानंकथमित्याह॥ **प्रतिरूपेति** ॥ कलादेवाइतिकुतोवगतमित्यतआह॥**विज्ञानेति** ॥ सप्राणमसृजते
त्यादिनाभगवदुत्पन्नासुकलासु विज्ञानात्मासहदेवैश्चसर्वैरितिदेवशब्दप्रयोगादित्यर्थः। यथासोम्येमाःसमुद्रायणाःसमुद्रंप्राप्येतिन
दीदृष्टांतपूर्वकंइमाःषोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंगच्छंतीतिजडेनुपपन्नपुरुषप्राप्तिलक्षणमुक्तिकथनाच्चगताःकलाइतिमुक्ता
देवाएवोच्यंतइत्यर्थः। पुरुषंप्राप्येत्युक्तेःपुरुषोजीवश्चेत्कथंतंप्राप्तानांमुक्तत्वमित्यतआह ॥ **सइति** ॥ सप्राणमसृजतेत्यादेर्वाक्या
त्पुरुषस्यप्राणादिस्रष्टृत्वावगमात्पुरुषोभगवान्। नद्यःसमुद्रंप्राप्यास्तंगच्छंतिनामरूपेविहाय तथानामरूपाद्विमुक्तइत्येतत्समुद्रंप्रा
प्तानांनदीनां भगवंतंप्राप्तानांमुक्तानांच नामरूपाभावप्रतीतिंनिवारयन्व्याचष्टे ॥ **अगम्येति** ॥ समुद्रंप्राप्तानांनदीनां
नामरूपयोःमहद्भिर्ज्ञायमानत्वाच्च न नामरूपाभावस्तासामित्याह ॥ **स्वकीयमुदकंनद्यइति** ॥ प्रकारांतरेणविमुक्तपदंव्याकरो
ति ॥ **विमुक्तइति** ॥ वीत्युपसर्गस्यनिषेधार्थत्वंक्वोपलब्धमित्यतःप्रयोगंदर्शयति ॥ **विप्रियइतिवदिति** ॥ नामरूपेविहायेत्य
स्यपदविभागप्रदर्शनेनचनामरूपराहित्याभावमर्थमाह ॥ **अविहायेतिचेति** ॥ ननुनामरूपेइत्यस्यप्रगृह्यत्वेनप्रकृतिभावावश्यं
भावात्संध्यभावात्कथमविहायेतिपदविभागइतिचेन्न। मणीवादिवदुपपत्तेः मुक्तानांनामवत्त्वंश्रुत्यासमर्थयते ॥ **अनंतमिति** ॥
मुक्तानांनामअनंतमविनाशीतिश्रुतिभावाच्चनमुक्तानांनामाभावइत्यर्थः। ब्रह्मवेदब्रह्मैवभवति परब्रह्मैवभवतीत्यन्यथाप्रतीतिंनि
वारयन्व्याचष्टे ॥ **परंब्रह्मेति** ॥ स्वयोग्यतोपबृंहितत्वमेवजीवस्यब्रह्मत्वमित्यत्रप्रमाणांतरंपठति॥ **ब्रह्मत्वमिति** ॥ उपक्रमा ॥ ९ ॥
नुगुणश्चायमेवार्थइत्याह॥ **यत्रेति** ॥ सूत्रानुसारित्वाच्चायमेवार्थइतिभेदसूचकानिसूत्राणिपठति॥ **ॐमुक्तोपसृप्येति** ॥ मुक्त

स्यब्रह्मणोभेदेश्रुतिस्मृतीपठति ॥ **नतेइति** ॥ मुक्तानांतारतम्यभावाच्चमुक्तेश्वरयोर्भेदएवेतिभावेनमुक्तानांतारतम्यप्रतिपादकंवा
क्यंपठति ॥ **मुक्तेभ्यइति** ॥ मुक्तस्यब्रह्मैक्येबाधकांतराणिचाह ॥ **येत्वित्यादिना** ॥ नास्याब्रह्मवित्कुलेभवतीत्येतत्यस्य
कस्यापिब्रह्मविदःकुलेब्रह्मविदेवभवतीतिप्रतीतिंनिवारयन्व्याचष्टे॥ **देवानामिति** ॥ अत्रहेतुमाह ॥ **यस्मादिति** ॥ प्रायश
इत्युक्तंविवरीतुमुक्तं बलवदिति । अन्येचकेचित्बलवद्धेतुतोज्ञानिनोभवंतीत्यर्थः । सुराणांकुलेप्रायशोज्ञानिनएवभवंतीत्येतत्
कृतयुगनिष्ठमेवेत्याह ॥ **सुराणामिति** ॥ तस्माद्भगवज्ज्ञानस्यैवंमहिमत्वात् ॥ खं०६ ॥ समापितभाष्योभगवानानंदतीर्थमुनिः
भाष्यकरणप्रयोजनंसूचयन्भाष्यांतेप्रणमति ॥ **प्रीयतामिति** ॥ **इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्याथर्व
णभाष्यस्यटीकाश्रीमज्जयतीर्थशिष्यव्यासतीर्थयतिकृतासंपूर्णा** ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः शाकः १८२५ सन १९०३.

॥ आथर्वणव्यासतीर्थीयटीकासंपूर्णा ॥